2. 173 (*on* ii. 105. 22); अज्ञानिनः स्यान्मरणं संसर्गः कारणात्मनि BṛĀraUBhVā. i. 4. 1673; अज्ञानिनो भ्रमो भ्रान्तो बध्यते स च मुच्यते IṣṭaSi. 193. 16; साकारं च निराकारं ब्रह्म यत् परिकीर्तितम् । अज्ञानिनो न पश्यन्ति पश्यन्ति ज्ञानचक्षुषः PadmP. iv. 101. 30; अज्ञानिभिर्देहे सुखबुद्ध्यात्र भण्यते ĪśānŚiP. ii. 65. 24; जनाः कृत्वेह कर्माणि सुखदुःखानि भुञ्जते । परत्राज्ञानिनो देवि यान्त्यायान्ति पुनः पुनः KulārT. 1. 52; 11. 28; तथायमज्ञानी जीवोऽपि ⋯ स्वकीयशुद्धप्राणं हन्ति TātpaVṛ. 211. 11 (*on* 2. 57); 329. 23 (*on* 3. 38); 349. 17 (*on* 3. 56); ज्ञानिनः सम्यग्दृष्टयोऽज्ञानिनो मिथ्यादृष्टयः SthānT. 92B. 10; ज्ञानी तेन प्रकाशेन प्रकाशित नाडीद्वारः सन् देहान्निष्क्रामति न तु तथाज्ञानी TattvPrakā. 211A. 3 (*on* iv. 2. 17); अज्ञानिनाप्यारब्धकर्मक्षये तन्निवृत्तेः JīvanVi. 44. 20; अहमपि ⋯ तस्मिन्नेव योगिन्याविर्भूतोऽवस्थितोऽस्मि । नेतरेष्वज्ञानिषु तेषामविद्यावृतत्वात् JīvanVi. 144. 20; अज्ञानी विदुषा पृष्टः कूटस्थं न प्रबुध्यते । न भाति नास्ति कूटस्थ इति बुद्ध्वा वदत्यपि PañcaDa. 6. 27; ज्ञानिनाज्ञानिनावापि यावद्देहस्य धारणम् । तावद्वर्णाश्रमप्रोक्तं कर्तव्यं कर्म मुक्तये SāṁkhyaPraBh. 26. 25 (*on* i. 56); **v** covered with nescience अज्ञानि ब्रह्म बुद्धीरनुसरति SaṁkṣeŚā. 2. 136 (ii. 86. 15); *m.* one who argues for the nescience द्वैतं न विद्यत इति तस्मादज्ञानिनां मतम् AnuVyā. 17A. 9 (*on* 1. 4); अज्ञानिनां पक्ष एव द्वैतं न विद्यते ViṣṇuTaNi. 14B. 7.

**अज्ञानिरजस्** (ajñāni-rajas) *n.* dust of an ignorant, ignorance (comm. *rajoguṇa* of an ignorant रजो बुद्धिगुणः पांसुना व्यवसितः) या (सरस्वती) वेगनृत्यद्रथहंसपक्षपुटैरिवाज्ञानिरजः प्रमार्ष्टि ŚrīKaC. 1. 36.

**अज्ञानिविनिश्चय** (ajñāni-viniścaya) *m.* decision of the ignorant न भाति नास्ति चाद्वैतमित्यज्ञानिविनिश्चयः PañcaDa. 6. 240.

**अज्ञानिविषयत्व** (ajñāni-viṣayatva) *n.* the state of pertaining to a person who is ignorant (of the Supreme Self) यदुक्तं 'नाभुक्तं क्षीयते कर्म' इति तस्याज्ञानिविषयत्वादविरोधः BrahmSūBh.(Śrī.) ii. 440. 3 (*on* iv. 1. 13)

**अज्ञानिसेवित** (ajñāni-sevita) *adj.* performed or practised by the ignorant प्रतिष्ठादेवकर्मादिध्यानादिफलयोगतः । सत्येऽपि न फलं दृष्टं क्वचिदज्ञानिसेवितात् ŚivaDṛ. 4. 28.

**अज्ञानीभूत** (ajñānī-bhūta) *adj.* who has become ignorant यो हि न खलु ज्ञानात्मानमात्मानमेकमग्रं भावयति सोऽवश्यं ज्ञेयभूतं द्रव्यमन्यदासीदति । तदासाद्य च ज्ञानात्मात्मज्ञानाद् भ्रष्टः स्वयमज्ञानीभूतो मुह्यति TattvPradī.(A.) 337. 4 (*on* 3. 43)

**अज्ञानीय** (ajñān-īya) *adj.* related to nescience अज्ञानस्थाने अज्ञानीयावरणशक्तिर्वाच्या LaCandr. 155. 41; नानाज्ञानपक्षेऽज्ञानीयनानाशक्तिपक्षे च शुक्त्यादिज्ञानेन किंचिदज्ञानस्य शक्तेश्च नाशः LaCandr. 489. 18.

**अज्ञानुग्रहकृत्** (ajñānugraha-kṛt) *adj.* favouring (i. e. compassionate towards) the ignorant अज्ञानुग्रहकृत्स्वभावं श्रीमद्विट्ठलं नमतम् Prasā. i. 3. 16.

**अज्ञानेतरत्व** (ajñānetara-tva) *n.* the state of being different from nescience अज्ञानेतरत्वस्य समव्याप्त्यभावात् NyāySu.(Ja.) 20B. 13 (*on* i. 1. 1)

**अज्ञानैककारण** (ajñānaikakāraṇa) *adj.* having the only cause of the nescience स एष इत्यनेनापि सुविरुद्धात्मतां ब्रुवन् । विरुद्धवस्तुसंसृष्टिं ब्रूतेऽज्ञानैककारणम् BṛĀraUBhVā. i. 4. 493.

**अज्ञानैकघस्मर** (ajñānaikaghasmara) *adj.* sole destroyer of nescience यच्चाप्यैकात्म्यविज्ञानं तदज्ञानैकघस्मरम् BṛĀraUBhVā.(Sambandha.) 362.

**अज्ञानैकत्व** (ajñānaika-tva) *n.* oneness of nescience अज्ञानैकत्वपक्षे तत्तद्विषयाकारवृत्त्यभावविशिष्टाज्ञानस्य तत्तद्विषयावरकत्ववद्वृत्तिधीविरहविशिष्टाज्ञानं भ्रमत्वावारकम् GuruCandr. i. 354. 7.

**अज्ञानैकव्यपाश्रया** (ajñānaikavyapāśrayā) *adj.* (*f.*) depending merely on nescience साध्यसाधनतां तस्मादज्ञानैकव्यपाश्रयाम् । उच्चैरनूद्य तत्तत्त्वं वेदान्ताः प्रत्यपीपदन् BṛĀraUBhVā. i. 2. 129.

**अज्ञानैकसमन्वय** (ajñānaika-samanvaya) *m.* close or invariable relation with nescience alone मिथ्याधियोऽपि बाध्यत्वमज्ञानैकसमन्वयात् BṛĀraUBhVā. i. 4. 438.

**अज्ञानैकहत** (ajñānaika-hata) *adj.* struck with mere ignorance (i. e. completely ignorant) अज्ञानैकहतो बाल्ये यौवने गृहतत्परः । वार्धकेऽपत्यचिन्तार्तः कर्मभिर्बध्यते पुनः ŚārṅgaPa. 4329.

**अज्ञानैकहेतुक** (ajñānaikahetu-ka) *adj.* having nescience as the only cause सद्वितीयपरोक्षत्वे यतोऽज्ञानैकहेतुके । न वस्तु स्पृशतः BṛĀraUBhVā. iv. 4. 852.

**अज्ञानैक्य** (ajñānaikya) *n.* oneness of nescience, nescience as one and only one अज्ञानैक्यपक्षे तदयोगात् Nyāyāmṛ. 639B. 7; अज्ञानैक्यं तु सर्वावस्थानुस्यूतैकाकारमादाय AdvaiSi. 487. 14; अज्ञानैक्येऽपि तच्छक्तिभेदात् ⋯ नानेत्यपि वदन्ति SiddhāTa. 2. 15; 4. 12; अज्ञानैक्यात् तदापि घटादिवृत्त्या संपद्यमानः स तत्स्वरूपः GuruCandr. ii. 150. 11; LaCandr. 394. 14.

**अज्ञानैक्यसमर्थन** (ajñānaikya-samarthana) *n.* substantiation or justification of oneness of nescience अवस्थास्वीकारपक्षे सर्वावस्थानुस्यूतैकाकारेणाज्ञानैक्यसमर्थनं न युक्तम् GuruCandr. ii. 156. 18.

**अज्ञानोक्ति** (ajñānokti) *f.* statement through ignorance अज्ञानोक्तौ दण्डयित्वा पुनः सीमां विचारयेत् KātySm. 741; अज्ञानोक्तौ त्वाह कात्यायनः SmṛtiCan. iv. 547. 6.

**अज्ञानोच्चारण** (ajñānoccāraṇa) *n.* utterance without the knowledge or intention यस्य नाम्नः फलमिदमज्ञानोच्चारणादपि SaurP. 3. 42.

**अज्ञानोच्छित्ति** (ajñānocchitti) *f.* annihilation of nescience अज्ञानोच्छित्तये ज्ञानं स्वतन्त्रं तेन भण्यते BṛĀraUBhVā.(Sambandha.) 373.

**अज्ञानोच्छिष्टकर** (ajñānocchiṣṭa-kara) *m.* hand (soiled by) the remains of food in the form of nescience (i. e. hand that is polluted by nescience) अभावविरोधानपेक्षस्याज्ञानोच्छिष्टकरस्य क्षालनं ज्ञानवारिणा । विशुद्धस्वात्मलिङ्गस्य हस्तप्रक्षालनं स्मरेत् NirguMāPū. 22.

**अज्ञानोच्छेद** (ajñānoccheda) *m.* annihilation or destruction of nescience अज्ञानोच्छेदस्यैव तत्कार्यप्रातीतिकसत्त्वापहारकत्वात् GuruCandr. i. 82. 16; ii. 151. 12; LaCandr. 487. 42.

**अज्ञानोच्छेदकत्व** (ajñānocchedaka-tva) *n.* nature of destroying nescience अज्ञानोच्छेदकत्वेऽपि विरोधिविषयकत्वं नापेक्षते GuruCandr. i. 83. 14.

**अज्ञानोत्तर** (ajñānottara) *n.* reply based on ignorance विशेषशास्त्रस्य विषयं निह्नवोत्तरं परिहृत्याज्ञानोत्तरे प्रवर्तते Mitā. 144. 9 (*on* 2. 20); एवमेव ⋯ व्यवहारे शङ्काभियोगाज्ञानोत्तरादिना मिथ्याभियोगनिह्नवाभावे दण्डाभावोऽध्यवसेयः SmṛtiCan. iii. 287. 17; सामान्यविषयं कात्यायनवचनं कर्तृविशेषशास्त्रस्य निह्नवोत्तरं परिहृत्याज्ञानोत्तरे प्रवर्तते Subodhi. 9. 4 (*on* 2. 20); अज्ञानोत्तरे ज्ञानाभावेनोत्तरे प्रवर्तते BālamBha. ii. 24. 23 (*on* 2. 20); निह्नवोत्तरमपहायाज्ञानोत्तर ईदृशे प्रवर्तते VīraMi. (Vyavahāra.) 100. 25.

**अज्ञानोत्थ** (ajñānottha) *adj.* arising from nescience अज्ञातात्मैकसाक्षित्वादज्ञानोत्थं न वस्तुगम् BṛĀraUBhVā. i. 4. 724; ii. 4. 239; iv. 3. 1073; अज्ञानोत्थबुद्ध्यादिकर्तृत्वोपाधिमात्मानं परिगृह्य ⋯ अनात्मधर्मत्वमुक्तम् NaiṣkaSi. 79. 6; नाज्ञानोत्थस्य विद्याजनिरिह घटते SaṁkṣeŚā. 2. 208 (ii. 124. 15)

**अज्ञानोत्थत्व** (ajñānottha-tva) *n.* the state of having arisen from nescience अहमर्थोऽनर्थोपसृष्टत्वादज्ञानोत्थत्वाच्च हेयः NaiṣkaSi. 152. 8.

**अज्ञानोत्थमहाभय** (ajñānottha-mahābhaya) *n.* great fear arising from nescience यच्छ्रुत्वा मुच्यते जन्तुरज्ञानोत्थमहाभयात् AdhyāRā. i. 2. 5.

**अज्ञानोत्पन्नवृत्ति** (ajñānotpanna-vṛtti) *f.* modification arising from nescience अन्तर्मुखो य आनन्दमयो ब्रह्मसुखं तदा । भुङ्क्ते चिद्बिम्बयुक्ताभिरज्ञानोत्पन्नवृत्तिभिः PañcaDa. 11. 65.

**अज्ञानोपरम** (ajñānoparama) *m.* end or destruction of nescience अज्ञानोपरमो मोक्षो विज्ञेयः ŚivaP. ii(5). 5. 30 (226A. 4)

**अज्ञानोपलम्भ** (ajñānopalambha) *m.* knowledge of ignorance अनुव्यवसायो नास्तीति निश्चयेऽप्यज्ञानोपलम्भाभावात् NyāyKu. 80. 9.

**अज्ञानोपहत** (ajñānopahata) *adj.* affected by ignorance अज्ञानोपहतो वेत्ति रहस्यं कथमुत्तमम् SkandP. ii(2). 2. 44; अज्ञानोपहतो बाल्ये यौवने मदनाहतः । ⋯किं करोतु कदा जनः Subhāṣi. 3303.

**अज्ञानोपहित** (ajñānopahita) *adj.* **1** delimited by nescience, having nescience as adjunct अज्ञानोपहितं चैतन्यं चेश्वरादिकम् VedāntSā.(Sa.) 21. 9; अज्ञानोपहितं बिम्बचैतन्यमीश्वरः SiddhāBi. 46. 1; स्वरूपं चाज्ञानोपहितमेव साक्षिविषयः AdvaiSi. 426. 4; ज्ञानस्यापि ⋯ अज्ञानोपहितानाश्रितत्वात् GuruCandr. ii. 411. 24; अज्ञानोपहितः कैश्चिच्छिन्नैरुपहितः परैः VedāntSiSūMañ. 1. 94; अज्ञानोपहित आत्मा ⋯ साक्षी ⋯ इति च कथ्यते SiddhāBi. 42. 6; अज्ञानोपहितस्य साक्षित्वेऽपि नाज्ञानं साक्षिकोटौ प्रविशति AdvaiSi. 261. 1; चिदात्मा ह्यज्ञानोपहितो भासकतया साक्षीति व्यपदिश्यते SiddhāTa. 5. 20; 13. 25; 60. 3; **2** consisting of insentience भट्टस्तु ⋯ सुषुप्तौ प्रकाशाप्रकाशसद्भावात् मामहं न जानामीत्याद्यनुभवाच्च अज्ञानोपहितं चैतन्यमात्मेति वदति VedāntSā.(Sa.) 19. 12.

**अज्ञानोपहितचित्** (ajñānopahita-cit) *f.* consciousness limited by nescience अज्ञानोपहितचिदेव ज्ञानाज्ञानयोराश्रयः GuruCandr. ii. 411. 18; ii. 411. 17; ii. 412. 5; प्रत्यक् अज्ञानोपहितचित् LaCandr. 558. 35; 563. 41.

**अज्ञानोपहितचैतन्य** (ajñānopahita-caitanya) *n.* consciousness having nescience as an adjunct तत्सिद्धमज्ञानोपहितचैतन्यरूपसाक्षिवेद्यत्वं देहस्य SiddhāTa. 12. 21.

**अज्ञानोपहितब्रह्मन्** (ajñānopahita-brahman) *n.* the Supreme Being delimited by nescience अज्ञानोपहितब्रह्मण्याविषयकाज्ञानवृत्तिप्रतियोगितासंबन्धेन